श्री॥गणेशायनमः श्रीरामचंद्रगुरवेनमः श्रीसिधेश्वरायनमः॥ ॐ॥सर्गस्थिति
प्रलयहेतुमचिंत्यशक्तिंविश्वेश्वरंविदितविश्वमनंतमूर्तिं॥निर्मुक्तबंधन
मपारसुखांबुराशिंश्रीवल्लभंविमलबोधघनंनमामि॥१॥यस्यप्रसादाद
हमेवविष्णुर्मय्येवसर्वंपरिकल्पितंच॥इत्थंविजानामिसदात्मरूपंतस्यां
घ्रिपद्मंप्रणतोस्मिनित्यं॥२॥तापत्रयार्कसंतप्तःकश्चिदुद्विग्नमानसः॥
समाधिसाधनैर्युक्तःसद्गुरुंपरिपृच्छति॥३॥अनायासेनयेनास्मान्मुच्येयं
भवबंधनात्॥तन्मेसंक्षिप्यभगवन्केवलंकृपयावद॥४॥साध्वीते
वचनव्यक्तिःप्रतिभातिवदामिते॥इदंतदितिविस्पष्टंसावधानमनाः
शृणु॥५॥तत्त्वमस्यादिवाक्योत्थंयज्जीवपरमात्मनोः॥तादात्म्यवि
षयंज्ञानंतदिदंमुक्तिसाधनं॥६॥कोजीवःकःपरश्चात्मातादात्म्यंवाकथं

श्री श्री र

न्योः ॥ तत्त्वमस्यादिवाक्यं वा कथं तत्प्रतिपादयेत् ॥ ७ ॥ अत्र भ्रमः
समाधानं कोन्यो जीवस्त्वमेव हि ॥ यस्त्वं पृच्छसि मां कोहं ब्रह्मैवासि
न संशयः ॥ ८ ॥ पदार्थमेव जानामि नाद्यापि भगवन्स्फुटं ॥ अहं
ब्रह्मेति वाक्यार्थं प्रतिपद्ये कथं वद ॥ ९ ॥ सत्यमाह भवानत्र वि
गानं नैव विद्यते ॥ हेतुः पदार्थबोधो हि वाक्यार्थावगतेरिह ॥ १० ॥
अंतःकरणतद्वृत्तिसाक्षीचैतन्यविग्रहः ॥ आनंदरूपः सत्यः सन्
किं नात्मानं प्रपद्यसे ॥ ११ ॥ सत्यानंदस्वरूपं धीसाक्षि
णं बोधविग्रहं ॥ चिंतयात्मतया नित्यं त्यक्त्वा देहा
दिगां धियं ॥ १२ ॥ रूपादिमान्यतः पिंडस्ततो
नात्मा घटादिवत् ॥ वियदादिमहाभूतविकार

नि

१

श्रीराम

त्वां चकुं भवतः॥ १३॥ अनात्मा यदि पिंडोयमुक्त

हेतुबलान्मतः॥ करामलकवत्साक्षादात्मानं प्र

तिपादय॥ १४॥ घटद्रष्टा घटाद्भिन्नः सर्वथा नघ

टो यथा॥ देहद्रष्टा नथा देहो नाहमित्यवधारय

॥ १५॥ एवमिंद्रियदृङ्नाहमिंद्रियाणीति निश्चि

नु॥ मनोबुद्धिस्तथा प्राणो नाहमित्यवधारय॥ १६॥

संघातोपि तथा नाहमिति दृश्यविलक्षणम्॥

द्रष्टारमनुमानेन निपुणं संप्रधारय॥ १७॥ देहे

-१५

4

वा सू र

२

द्रियादयो भावाहानादिव्याप्तिक्षमाः ॥ प
त्यसंनिधिमात्रेण सोहमित्यवधारय ॥ १८ ॥ अनु
पन्नविकारः सन्नपस्कांनवदेवयः क्षुध्यादीश्वा
लयत्यव सोहमित्यवधारय ॥ १९ ॥ अजडात्म
वदाभांति यत्सानिध्याज्जडा अपि ॥ देहेंद्रिय
मनःप्राणाः सोहमित्यवधारय ॥ २० ॥ अगमने
मनोन्यत्र सांप्रतं चास्थिरीकृतं ॥ एवं योवेदधी
वृत्तिं सोहमित्यवधारय ॥ २१ ॥ स्वप्नजागरितसु

ति

श्रीराम

२

5

सिंभावाभावौधियांतथा॥ योवेत्त्यविक्रियःसा
क्षात्सोहमित्यवधारय॥ २२॥ घटावभासकोदी
पोघटदन्योयथेष्यते॥ देहावभासकोदेहीत
थाहंबोधविग्रहः॥ २३॥ पुत्रवित्तादयोभावाय
स्यशेषतयाप्रियाः॥ द्रष्टासर्वप्रियतमःसोहमि
त्यवधारय॥ २४॥ परप्रेमास्पदतयामानभूवमहंस
दा॥ भूयासमितियोद्रष्टासोहमित्यवधारय॥ २५॥
यः साक्षिलक्षणोबोधस्त्वंपदार्थःसउच्यते॥

नान्य द्र साक्षित्वमपिबोधत्वमविकारितयात्मनः ॥ २६ ॥ नि

देहेंद्रियमनःप्राणाहंकृतिभ्यो विलक्षणः ॥ प्रो

ज्झितारोषषड्भावविकारस्त्वंपदाभिधः ॥ २७ ॥

३ त्वमर्थमेवंनिश्चित्य तदर्थं चिंतयेत्पुनः ॥ अतद्व्या

वृत्तिरूपेण साक्षाद्विधिमुखेन च ॥ २८ ॥ निरस्ता

शेषसंसारदोषोऽस्थूलादिलक्षणः ॥ अदृश्यत्वा

दिगुणकः पराकृततमोमलः ॥ २९ ॥ निरस्तातिश

यानंदः सत्यप्रज्ञानविग्रहः ॥ सत्तास्वलक्षणः

श्रीराम

३

7

पूर्णः परमात्मेति गीयते ॥ ३० ॥ सर्वज्ञत्वं परेशत्वं तथा
संपूर्णशक्तिता ॥ वेदैः समर्थ्यते यस्य तद्ब्रह्मेत्यवधा
रय ॥ ३१ ॥ यज्ज्ञानात्सर्वविज्ञानं श्रुतिषु प्रतिपादितं ॥
मृदाद्यनेकदृष्टांतैस्तद्ब्रह्मेत्यवधारय ॥ ३२ ॥ यदानं
त्यं प्रतिज्ञाय श्रुतिस्तत्सिद्धये जगौ ॥ तत्कार्यत्वं प्रप
ञ्चस्य तद्ब्रह्मेत्यवधारय ॥ ३३ ॥ विजिज्ञास्यतया य
द्वेदांतेषु मुमुक्षुभिः ॥ समर्थ्यतेतियत्नेन तद्ब्र
ह्मेत्यवधारय ॥ ३४ ॥ जीवात्मना प्रवेशश्च नियं

वाक्यप्र ४

तत्वंचनान्यथेति ॥ श्रूयतेनपरस्यैवेदंपुनर्ब्रह्मेत्यवधार
य ॥ ३५ ॥ कर्मणांफलदातत्वंपरस्यैवश्रूयतेश्रु
तौ ॥ जीवानांहेतुकर्तृत्वंनब्रह्मेत्यवधारय ॥ ३६ ॥
तत्वंपदार्थौनिर्णीतौवाक्यार्थश्चिंत्यतेधुना ॥ ता
दात्म्यमत्रवाक्यार्थस्तयोरेवपदार्थयोः ॥ ३७ ॥
संसर्गोवाविशिष्टोवावाक्यार्थोनात्रसंमतः ॥ अ
खंडैकरसत्वेनवाक्यार्थोविदुषांमतः ॥ ३८ ॥ प्रत्य
ग्बोधोयआभातिसोद्वयानंदलक्षणः ॥ अद्वया

ति

श्रीराम

४

नंदरूपश्च प्रत्यग्बोधैकलक्षणः॥ ३९॥ इत्थम
न्योन्यतादात्म्यप्रतिपत्तिर्यदा भवेत्॥ अब्रह्मत्वंत्व
मर्थस्य व्यावर्तेत तदैव हि॥ ४०॥ तदर्थस्य च पारो
क्ष्यं यद्येवं किं ततः शृणु॥ पूर्णानंदैकरूपेण प्रत्यग्बो
धावतिष्ठते॥ ४१॥ तत्त्वमस्यादिवाक्यं च तादात्म्यप्र
तिपादने॥ लक्ष्यौ तत्त्वंपदार्थौ द्वावुपादाय प्रवर्तते
॥ ४२॥ हित्वा द्वौ शबलौ वाच्यौ वाक्यं वाक्यार्थबोध
ने॥ यथा प्रवर्तते ऽस्माभिस्तथा व्याख्यातमादरात्॥ ४३॥

आलंबनतयाभातियेस्मत्पत्ययशब्दयोः॥ अंतः
करणसंभिन्नबोधसत्वंपदाभिधः॥ ४४॥ मायो
पाधिर्जगद्योनिः सर्वज्ञत्वादिलक्षणः॥ पौराक्ष्य
शबलः सत्याद्यात्मकस्तत्पदाभिधः॥ ४५॥ प्रत्यक्प
रोक्ष्यैकस्यसद्वितीयत्वपूर्णता॥ विरुध्येतेयतस्त
स्माल्लक्षणासंप्रवर्तते॥ ४६॥ मानांतरविरोधेतु
मुख्यार्थस्यपरिग्रहे॥ मुख्यार्थेनाविनाभूतेप्र
तीतिर्लक्षणोच्यते॥ ४७॥ तत्त्वमस्यादिवाक्येषु

क्षणाभागलक्षणा ॥ सोयमित्यादिवाक्यस्थप
दयोरिवनापरा ॥ ५८ ॥ अहंब्रह्मेतिवाक्यार्थ
बोधोयावद्दृढीभवेत् ॥ शमादिसहितस्ता
वदभ्यसेछ्रवणादिकं ॥ ५९ ॥ श्रुत्याचार्यप्रसा
देनदृढोबोधोयदाभवेत् ॥ निरस्ताशेषसंसा
रनिदानःपुरुषस्तदा ॥ ६० ॥ विशीर्णकार्यकरणो
भूतसूक्ष्मैरनावृतः ॥ विमुक्तकर्मनिगडःसद्य
एवविमुच्यते ॥ ६१ ॥ प्रारब्धकर्मवेगेनजीवन्मु

वाक्यवृ
वृ
श्रीमद्गुरु
चार्य

जीवन्मुक्तो यदा भवेत् ॥ कंचित्कालमनारब्धक
र्मबंधस्य संक्षये ॥ ९२ ॥ निरस्तातिशयानंदं
वैष्णवं परमं पदम् ॥ पुनरावृत्तिरहितं कैवल्यं
प्रतिपद्यते ॥ ९३ ॥ इति श्रीगोविंभगवत्पूज्यपा
दशिष्य श्रीमत्परमहंसपरिव्राजकाचार्य विरचि
तावाक्यवृत्तिः समाप्ता ॥ ७ ॥ श्रीमत्सीताराम
चंद्रप्रमुखपंचायतनश्रीमत्सद्गुरुनाथचरण
कमलेसमर्पयामिनमः ॥ श्रीत्रिगुणात्मिकादुर्गा

नि
श्रीराम
१३

देव्यैनमोस्तुते ॥ इदं पुस्तकं कार्तीक शुधनवमी
भृगुवारदिने समाप्तं ॥ शके १७०९ सिधार्थी
नामसंवत्सरे ॥ शुभंभवतु ॥ छ ॥ छ ॥ छ ॥
॥ श्री: ॥

इति श्री वाक्यरत्नसमाप्त
श्री ॥ रा ॥ म ॥